# Jitam Te Stotram

# जितं ते स्तोत्रम्

## Document Information

Text title : jitantestotram

File name : jitamtestotram.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Source : Pancharatra

Latest update : January 3, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Jitam Te Stotram

# जितं ते स्तोत्रम्

श्रीगणेशाय नमः ।

प्रथमभागः ॥

जितं ते पुखरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ १॥

देवानां दानवानां च सामान्यमधिदैवतम् ।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥ २॥

एकसवमसि लोकस्य स्रष्टा संहारकस्तथा ।
अध्यक्षश्चानुमलता च गुणमायासमावृतः ॥ ३॥

संसारसागरं घोरमनन्तक्लेशभाजनम् ।
त्वामेव शरणं ग्राप्य निस्तरन्ति मनीषिणः ॥ ४॥

न ते रूपं ऋ चाकारो नायुधानि न चास्पदम् ।
तथापि पुरुपाकारो भक्तानां त्वं प्रकाशसे ॥ ५॥

नैव किञ्चित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ।
नैव किञ्चिदसिद्धं ते न च सिद्धोऽसि कस्यचित् ॥ ६॥

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।
योगानां परमां सिद्धिं परम ते पदं विदुः ॥ ७॥

अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे ।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥ ८॥

कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।
शरीरे च गतो चापि वर्तते मे महद्भयम् ॥ ९॥

त्वत्पथकमलादन्यन्न मे जन्मान्तरेष्वपि ।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥ १०॥

विज्ञानं यदिदं प्राप्तं यदिदं स्थानमर्जितम् ।
जन्मान्तरेऽपि मे देव मा भूत्तस्य परिक्षयः ॥ ११॥

दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं नु विन्देत तावतास्मि कृती सदा ॥ १२॥

न कामकलुषं चित्तं मम ते पादयोः स्थितम् ।
कामये वैष्णवत्वं तु सर्व जन्मसु केवलम् ॥ १३॥

सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किङ्करोऽस्मि हृषीकेश भूयो भूयोऽस्मि किङ्करः ॥ १४॥

इत्येवभनया स्तुत्या स्तुत्वा देवं दिने दिने ।
किङ्करोऽस्मीति चात्मानं देवायैवं निवेदयेत् ॥ १५॥

यच्चापराधं कृतवाच्छानात्पुरुषोत्तम ।
मद्भक्त इति देवेश तत्सर्वं क्षन्तुमर्हसि ॥ १६॥

अहङ्कारार्थकामेषु प्रीविरद्यैव नश्यतु ।
त्वां प्रपन्नस्य भे दैव वर्धतां श्रीमति त्वयि ॥ १७॥

क्वाहमत्यंतदुर्बुद्धिः क्व ःवात्महितवीक्षणम् ।
यद्धितं मम देवेश तदाज्ञापय माधव ॥ १८॥

सोऽहं ते देवदेवेश नार्चनादौ स्तुतौ न च ।
सात्सर्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे ॥ १९॥

उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिभाव्यावनि क्षमस्व पुरुषोत्तम ॥ २०॥

---

द्वितीयभागः ।
जित ते पुण्डरीकाक्ष पूर्क्षेऽध्वगहण्यविग्रह ।
परानन्द परं ब्रह्मन्नमस्ते परमात्मने ॥ १॥

नमस्ते पीतवसन नभः कटकधारिणे ।
नमो नीलालकाबद्धवेणोसुदरविग्रह ॥ २॥

स्फुरद्रलयच्छ्रयूरपुरालदभूषणैः ।

शोभनैर्भूषिताकार कल्याणगुणवारिधे ॥ ३॥

करुणापूर्णहृदय शङ्खचक्रगदाधर ।
अमृतानन्दपूर्णाभ्यां लोचनाभ्यां विलोकय ॥ ४॥

कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम् ।
अपराधसहस्राणामाकर करुणाकर ॥ ५॥

कृपया मां क्येलया गृहाण मधुराधिप ।
विषयार्णवमग्नं माभुद्धर्ह्यं त्वमिहार्हसि ॥ ६॥

पिता माता सुहृद्बन्धुर्भ्राता पुत्रस्त्वमेव हि ।
विद्या धनं च काम्यं अ नान्यत्किञ्चित्त्वया विना ॥ ७॥

यत्र कुत्र कुले वासोद्येषु केषु भवोऽस्तुभे ।
तव दास्यैकभीमे स्यात्सदा सर्वत्र मे रतिः ॥ ८॥

मनसा कर्मणा वाचा शिरसा वा कथञ्चन ।
त्वां विना नान्यभुष्ठिश्य करिष्ये किञ्चिदप्यहम् ॥ ९॥

पाहि पाहि जगन्नाथ कृपया भक्तवत्सल ।
अनाथोऽहमधव्योऽहमकृतार्थः कथञ्चन ॥ १०॥

नृशंसः पापञ्भूरो वञ्चको निष्ठुरः सदा ।
भवाणवनिमग्नं माभनन्य कलोदधे ॥ ११॥

करुणापूर्णदृष्टिभ्यां वमिं मामवलोकय ।
त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो ॥ १२॥

मया कृतानि पापानि त्रिविधाह्नि पुनः पुनः ।
त्वत्पादपकजं प्रातुं नान्यत्त्वत्करुणां विना ॥ १३॥

साधनानि प्रसिद्धानि यागादीन्यब्जलोचन ।
त्वदाज्ञया प्रयुक्तानि त्वामुद्दिश्य कृतानि वै ॥ १४॥

भक्त्यैकलभ्यः पुरुषोत्तमोऽसौ जगत्प्रसूतिस्थितिनाशहेतुः ।
अकिचनोऽनन्यगतिः शरण्य गृहाण मां क्लेशिनमस्तुजाक्ष ॥ १५॥

धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन ।
त्वत्पादपङ्कजास्वादजीवितं दीयतां मम ॥ १६॥

कामये तावज्जवेन परिचर्यानुवर्तनम् ।
नित्यकिङ्करभावेन परिगृह्णीष्व मां विभो ॥ १७॥

लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ १८॥

नित्यसिद्धैः समाकीर्णं तन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैर्युतम् ॥ १९॥

वापीकूपतटाकैश्च वृक्षखण्डैः सुमण्डितम् ।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभच्चे ॥ २०॥

प्रकृष्टसत्त्वसम्पन्नं कदा द्रक्ष्यामि चक्षुषा ।
क्रीडत रमया सार्धं लीलाभूमिषु केशवम् ॥ २१॥

मेवश्याम विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ।
उन्नसं चारुवदद्धनं बिम्बोष्ठे शोभिताननम् ॥ २२॥

विशालवक्षसं श्रीशं कम्बुग्रीवं जगद्गुरुम् ।
आजानुबाहुपरिधमुन्नतास मधुद्विषम् ॥ २३॥

विशालनिम्ननाभिं तमापीनजघनं हरिम् ।
करभोरु श्रियः कान्तं कदा द्रक्ष्यामि चक्षुषा ॥ २४॥

शङ्खचक्रगदापद्मैरङ्कितं पादपङ्कजम् ।
शरच्चन्द्रशताक्रान्तनखराजिविराजितम् ॥ २५॥

सुरासुरैर्वन्त्यमानमृषिभिर्वीबदत सदा ।
कदा वा देव मूर्धानं मामकं मडीअध्यति ॥ २६॥

कदा गम्भीरया वाचा श्रिया युक्तो जगत्पतिः ।
चामरव्यग्रहस्तं मामेवं कुर्विति वक्ष्यति ॥ २७॥

कदाऽहं राजराजेन गणनाथेन चोदितः ।
चरेयं भगवत्पादपरिचर्यानुवृत्तियु ॥ २८॥

शान्ताय च विशुद्धाय तेजसे परमात्मने ।
नमो भगवते विष्णो वासुदेवामितद्युते ॥ २९॥

नमः सर्वगुणातीत षड्गुणायादिवेधसे ।
सत्यज्ञानाजन्तगुण ब्रह्मणे परमात्मने ॥ ३०॥

चतुःपञ्चनवव्यूहदशद्वादशमूर्तये ।
नमस्ते वासुदेवाय ब्रह्मणे चतुरात्मने ॥ ३१॥

नमोऽनैताय विश्वाय विश्वातीताय चक्रिणे ।
नमस्ते पञ्चकालज्ञ पञ्चकालपरायण ॥ ३२॥

पञ्चकालैकमनस्श त्वमेव गतिरव्ययः ।
परे व्योम्नि स्थितं देवं निरवद्यं निरञ्जनम् ॥ ३३॥

अप्रमेयमजं विष्णुमब्जनाभं सुरेश्वरम् ।
वङ्गातीतं परं शान्तं शरणं त्वां गतोऽस्वयहम् ॥ ३४॥

धुर्यं द्वन्द्वातिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम् ।
विश्व९रूप विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ॥ ३५॥

मोक्षं सालोक्यसारूत्तय प्रार्थये न कदाचन ।
इच्छाम्यहं महाबाहो सायुज्यं तव सुव्रत ॥ ३६॥

सकलावरणातीत किङ्करोऽस्मि तवानघ ।
पुनः पुनः किङ्करोऽस्मि तवाहं पुरुषोत्तम ॥ ३७॥

आसनाद्यनुयागान्तमर्चनं यन्मया कृतम् ।
भोगहीनं क्रियाहीनं मन्त्रहनिमभक्तिच्च ॥ ३८॥

तत्सर्वं क्षम्यतां दैव दीनं मामात्मसात्कुरु ।
इति स्तोत्रेण देवेशं स्तुत्वा सधुलिवातिनम् ॥ ३९॥

यागावसानसमजे देवदेवस्य चक्रिणः ।
नित्यकिङ्करभावेध स्वात्मानं विनिवेदयेत् ॥ ४०॥

---

तृतीयभागः ।
जितं ते पुण्डरीब्राक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ १॥

विज्ञापनमिदं देव शृणु त्वं पुरुषोत्तम ।
नरनारायणाभ्यां च श्वेतद्वीपनिवत्सिभिः ॥ २॥

नारदाद्यैर्मुनिगणैः सनकाद्यैश्च योगिभिः ।

ब्रह्मेशाद्यैः सुरगणैः पचकालपरायणैः ॥ ३॥

पूज्यसे पुण्डरीकाक्ष किथमद्धैर्महर्षिभिः ।
पाखलधर्मसङ्कीर्णो भगवद्भस्त्विवर्जित ॥ ४॥

कलम् ।
जातोऽस्मि देवेश सर्वधर्मबहिच्छते ।
कथं त्वामसमाचारः पापप्रसवभूरहम् ॥ ५॥

अर्चयामि दयासिन्धो पाहि मां शरणागतम् ।
तापत्रयदवाग्नौ मां दह्यमानं सदा विभो ॥ ६॥

त्राहि मां पुण्डरीकाक्ष केवलं कृपया तव ।
जन्ममृत्युजराव्याधिदुःखसंतप्तदेहिनम् ॥ ७॥

पालयाशु दृशा देव तव कारुण्यगर्भया ।
इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम ॥ ८॥

शरीरं मम देवेश व्याधिभिः पति पीडितम् ।
मनो मे पुण्डरीकाक्ष विषयानेव धावति ॥ ९॥

वाणी मम हृऽपीकेश मिथ्यापारुष्यदूषिता ।
एवं साधनहीनोऽहं किं करिष्यामि केशव ॥ १०॥

रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा ।
अपराधशतङ्घौ सहस्रमयुतं तथा ॥ ११॥

अर्बुदं चाश्चयसङ्ख्येयं कस्याठ्यधे क्षमस्व मे ।
यच्चापराधं कृतवानज्ञानात्पुरुषोत्तम ॥ १२॥

मद्भक्त इति देवेश तत्सर्वं क्षन्तुमर्हसि ।
अज्ञत्वादप्यशक्तत्वादालस्याद्दुष्टभावनात् ॥ १३॥

कृतापराधं कृपणं क्षन्तुमर्हसि मां विभौ ।
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ॥ १४॥

तानि सर्वाणि मे देव क्षमस्व मधुसूदन ।
यच्छमनः प्रभृति मोहवशं गतेन नानापराधशतमाचरितं मया ते ।
अन्तर्बहिश्च सकलं तव पश्यतो मे क्षन्तुं त्वमर्हसि हरे करुणावशेन ॥ १५॥

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।

केशवाराधने सा स्याज्जन्मजन्मह्वतरेष्वपि ॥ १६॥

चतुर्थभागः ।
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्ते वासुदेवाय शातानतचिदात्मने ॥ १॥

अध्यक्षाय स्वतन्त्राय निरपेक्षाय शासते ।
अच्युतायाविकाराय तेजसां निधये नमः ॥ २॥

प्रधानपुरुषेशाय नमस्ते पुरुषोत्तम ।
क्लेशकर्माद्यसंस्पृष्टपूर्णषाड्गुण्यमूर्तये ॥ ३॥

त्रिभिर्ज्ञानबलैश्वर्यवीर्यशक्त्यन्तरात्मने ।
त्रियुगाय नमस्तेऽस्तु नमस्ते चतुरात्मने ॥ ४॥

चतु ।
पञ्चनवज्ञछदशद्वादशमूर्तये ।
अनेकमूर्तये तुभ्यमसूतायैकमूर्तये ॥ ५॥

नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ।
सुभ्रूरललाट सुनस सुस्मिताधरपल्लव ॥ ६॥

पीनवृत्तायतभुज श्रीवत्सकृतलक्षण ।
तनुमध्य विशालाक्ष पद्मनाभ नमोऽस्तु ते ॥ ७॥

छिलासविक्रमाक्रान्तत्रैलोक्यचरणास्तुज ।
नमस्ते मीतवसन स्फुरन्धकरकुशङ्खल ॥ ८॥

स्फुरन्किरीटकशु हारकौस्स्तुभभृपण ।
पञ्चा युध नमस्तेऽस्तु नमस्ते पाञ्चकालिक ॥ ९ नृ ।
पञ्चकालपरेकान्ति योगक्षेममहाप्रभो ।
नित्यज्ञानबलेश्वर्यभोगोपकरणाच्युत ॥ तव ०॥

नमस्ते ब्रह्मरुद्रादि लोकयात्रापरिच्छद ।
जन्मप्रभृति दासोऽस्मि शिध्योऽस्मि तनयोऽस्मि ते ॥ ११॥

त्वं च स्वामी गुरुश्चात्मा पिता च भम माधव ।
अपि त्वां भगवन् ब्रह्मा शर्वः शक्रो महर्षयः ॥ १२॥

बऽ यष्टुमपि स्तोतुं न हिं स्मर्तुमपीशते ।
तापत्रयमहाग्राहभीषणे भवसागरम् ॥ १३॥

मज्जतां नाथ जौरेषा प्रणतिस्त्वत्पदार्पिता ।
अनाथाय जगन्नाथ शरण्य शरणार्थिने ॥ १४॥

प्रसीद् सीदते मह्यं नमस्ते भक्तवत्सल ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चनम् ॥ १५॥

तत्क्षतहय प्रपन्नानामपराधसहो ह्यसि ।
अज्ञानाद्यदि श ज्ञानादशुभं यत्कृतं मया ॥ १६॥

क्षतव्यं तदशेषेण दास्येन च गृहाण माम् ।
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किकरोऽस्मि हृपीकश स्थो भूयोऽस्मि किङ्करः ॥ १७॥

---

पञ्चमभागः । (भार्गवतन्त्रे २६-)
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ १॥

नमस्ते वासुदेवाय शान्तानन्ताजितात्मने ।
अजिताय नमस्तुभ्यं लदुण्डलुठ नमः ॥ २॥

महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥ ३॥

सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
अभृतयि नमस्तुभ्यमेकमूर्ताय ते नमः ॥ ४॥

अनेकमूर्तये तुभ्यमक्षराय च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥ ५॥

चिन्मात्ररूपिणे तुभ्यं नमस्त्रैयन्तमूर्तये ।
अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥ ६॥

नेदिष्ठाय यविष्ठाय सर्वान्तर्यामिनेनमः ।
वर्षिष्ठाय जविष्ठाय कनिष्ठाय च ते नमः ॥ ७॥

पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिने नमः ।

कल्पनाक्रोडरूपाय सृष्टिस्थित्यन्तहेतवे ॥ ८॥

नमस्ते गुणरूयाय गुणरूपादिवर्तिने ।
व्यस्ताय च समस्ताय सभस्तङ्गयस्तल्पपेणे ॥ ९॥

आदिमछगन्तशून्याय सत्त्वस्थाय नभो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपियणे ॥ १०॥

लोकयात्राप्रसिद्ध्यर्थं स्वहुर्ब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहाद्विमूर्तिभेदाय विष्णवे ॥ ११॥

विपाकैः कर्मभिः क्षोभैरस्पृष्टवपुषे नमः ।
नित्यसाधारणानेकलोकरक्षापरिच्छिदे ॥ १२॥

सच्चिदानन्दरूपाय वरेण्याय नमो नमः ।
यजमानाय यज्ञाय यष्टव्याय नमो नमः ॥ १३॥

इज्याफल नमस्तुभ्यं नम इज्यादिशीलिने ।
नमः परमहंसाय नमः सत्त्वगुणाय च ॥ १४॥

स्थिताय परमव्योम्रि भूयो भूयो नमो नमः ।
संसारविषयावर्तसङ्कुले च महाभये ॥ १५॥

अपारे दुण्डरेऽगाधे पतितं कर्मभिः स्वकैः ।
अनाथमतिगम्भीरं दयया परया हरे ॥ १६॥

मामुद्धर दयासिन्धो सिन्धोरस्मात्सुदुस्तरात् ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ॥ १७॥

तत्सर्वं क्षम्यतां देव दनि मामात्मसात्कुक्त ।
नाहं हितं न जानामि त्वां व्रजाम्येव ज्जेलम् ॥ १८॥

बुद्ध्यैव नय गोविन्द भुस्त्रपायेन वर्त्मना ।
त्वमेव वेत्सि श्रेयो मे नेदमेतदितीति च ।
बुद्धियोगं च मे देहि येन त्वामुपयाम्यहम् ॥ १९॥

---

षष्टभागः ॥

जितं ते पुङ्गरीकाक्ष नमस्ते विश्वभावन ।
नभभोऽस्तु हृर्पाकेश महापुरुष पूर्वज ॥ १॥

क्षामद्वारवतीनाथ वर्धतां विजयी भवान् ।
दिव्यं त्वदीयमैश्वर्यं निर्मर्यादविजृम्भितम् ॥ २॥

देवीभूपायुधैर्नित्यैर्मुमुक्तैर्मोक्षैकलक्षणैः ।
सत्योत्तरसवदीयैश्च सङ्गस्थाभिरसस्तव ॥ ३॥

प्राकारगोःपुरवरप्रासादमणिमण्डपाः ।
शालिभुद्गतिलार्दानाशालाशैलकुलोह्वला ॥ ४॥

रञ्जकाञ्चनकौशेयक्षौमक्रमुकशालिकाः ।
शय्यागृहाणि पर्यङ्कवर्याः स्थूलासनानि च ॥ ५॥

कनत्कनकस्मारपतद्ग्रहकलाचिकाः ।
छत्रःवामरमुग् ।
याश्च सन्तु नित्याः परिच्छदाः ॥ ६॥

अस्तु निस्तुलमव्यग्रं नित्यमभ्यर्चनं तव ।
पक्षे पक्षे विजुनभतां मासि मासि महोत्सवाः ॥ ७॥

मणिकाञ्चनचित्राणि भूषणान्यबराणि च ।
काश्मीरसारकस्त्रिकर्पूराद्यनुलेपनम् ॥ ८॥

कोमलानि च दामानि कौसुमैः सौरभोसुमैः ।
धूपाः कर्पूरदीपाश्च सन्तु नित्याः परिच्छदाः ॥ ९॥

नृत्तगीतयुतं वाद्यं नित्यमत्र विवर्धताम् ।
श्रोत्रेषु नः सुधाधाराः कल्पतां काहलस्वनाः ॥ १०॥

कन्दमूलफलोदग्रं काले काले चतुर्विधम् ।
सूपापूपवृतक्षीरशर्करासहितं हविः ॥ ११॥

धनसारशिरोदग्रं क्रमुकाष्टदलान्वितम् ।
विमलप्ति च ताच्छदलानि स्वीकुरु प्रभो ॥ १२॥

प्रीतिभीतिसुतो भूयान्नित्यं प ॥ अजनस्तव ।
भक्तिमन्तो हि भुञ्जन्तु पौरा जानपदैः सह ॥ १३॥

धरणीधनरत्नाद्धि वितरन्तु चिरं तव ।
कैकर्यमस्त्रिलं सर्वे कुर्वन्तु क्षोणिपालकाः ॥ १४॥

प्रेमीढुग्धदृशस्मेरं प्रेक्षमाणास्त्यदाननम् ।
महान्तः सन्ततं सन्तो मङ्गलानि प्रयुंजताम् ।
साममेवमवन्नित्यं पालयन् कुशलीभवाम् ॥ १५॥

इति पाञ्चरात्रे जितं ते स्तोत्रं सम्पूर्णम् ॥

Proofread by PSA Easwaran

*Jitam Te Stotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*